यदि मां प्रति फलातिप्रसञ्जकत्वं तदा त्वां प्रत्यपि समानः प्रसङ्गः। स्यादेतन्नियतवाग्व्यवहारक्रियासमयबन्धेन कथां प्रवर्त्तयतापि व्यवहारसत्ताभ्युपगन्तव्या नहि सत्तामनभ्युपगम्य व्यवहारक्रियाभिधातुं शक्या। क्रिया हि निष्पादना असतः सद्रूपताप्रापणमिति यावत् प्रमाणैर्व्यवहर्त्तव्यमिति नियमबन्धने प्रमाणानां कारणभावो नियतः तद्भावश्च नियतपूर्व्वसत्तारूपं कारणत्वम् प्रमाणानामनादाय न पर्य्यवस्येत्। दूषणानाञ्चास्तित्वेन भङ्गावधारणनियमबन्धने साधनाङ्गानां व्याप्त्यादीनां सत्त्वेन तद्विषयस्य तत्त्वरूपताव्यवहारनियमनादौ च कण्ठोक्त्यमेव तस्य तस्य सत्त्वमङ्गीकृतमिति रिक्तमिदमुच्यते प्रमाणादीनां सत्तामनभ्युपगम्य कथारम्भाः शक्यन्त इति। मैवम्। एभिरपि बाधकैः कथायामारब्धायामेवाभिमतस्य प्रसाधनीयत्वे पूर्व्वोक्तबाधायामनिस्तारात्। न च व्यवहारनियमस्य स्वेच्छाकृतस्यैव प्रमाणादिसत्तास्वीकारपर्य्यवसायितया नायं दोषः स्यात्। यतः सत्ताज्ञानस्य तत्राङ्गत्वं न तु सत्तायाः। तत्र किं सत्तावगममात्रात्सत्ताभ्युपगम्येति मन्यसे अबाधितात्तदवगमाद्वा। न तावदाद्यः मरुमरीचिकादौ जलरूपतासत्त्वाभ्युपगमप्रसङ्गात्। द्वितीयेऽपि किं वादिप्रतिवादिमध्यस्थमात्रस्य तस्यापि किं कथाकालमात्रएव बाधितत्वावगमाभावात्। अथवा कस्यचिदपि कालान्तरेऽपि च बाधितत्वबोधविरहात्। नाद्यः अतिप्रसङ्गात् पुरुषत्रयावगतस्य एकक्षणावगतस्य च पुरुषान्तरेण तेनापि क्षणान्तरे बहुलं बाध्यतादर्शनादिति। नचासावर्थोऽसन्नपि द्वित्रादिपुरुषमात्रपूर्व्वजाततत्प्रतीत्यनुरोधाद्बाधदर्शने सत्यपि तथैव सन्नित्यभ्युपगम्यते। तस्माद्द्वितीयः पक्षः परिशिष्यते यत्र सर्व्वप्रकारेण बाधितत्वं नास्ति तत्सदित्यभ्युपगन्तव्यम्। तदित्थं यदि नाम वादिप्रतिवादिमध्यस्थमात्रस्य दूषणादिसत्तावगमः कथाकालमात्रे तैरबाध्यमानः कथाङ्गत्वेनाभ्युपेयते किमायातं सर्व्वप्रकाराबाधिततत्तत्सत्तावगमायत्ततत्तत्सत्त्वाभ्युपगमकथानङ्गताङ्गीकारस्य। कतिपयप्रतिपत्तृकतिपयकालतथात्वावगमादेव च प्रायेण लौकिकव्यवहारः प्रतीयते तादृशश्चायं सत्त्वावगमः कथाङ्गमेतत्तदुच्यते व्यावहारिकीं प्रमाणादिसत्तामादाय विचारारम्भ इति। तस्माद्यादृग्व्यवहारनियमः कृतः तन्मर्य्यादानेन नोल्लङ्घितेति। यद्वादिवाग्व्यवहारे मध्यस्थावगमः स विजयते यस्य च वचसि नैवं तस्यावगमस्तस्य पराजयः। यत्र वाद्युक्तनिग्रहसत्त्वावगमः स निगृहीतः तदितरस्तु न तथेत्यादिनियम एव कथारम्भाय ग्राह्यः। अनेन नियमेन व्यवहर्त्तव्यमित्यस्य ह्ययमर्थोऽनेन नियमेनोक्तमनेन नेति मध्यस्थावगमस्य विषयी भवितव्यमिति। नच वाच्यमन्ततस्तदवगमस्यापि सत्ताभ्युपेयेति। तस्यापि सत्ताचिन्तायां तत्सत्तावगमान्तरस्यैव शरणत्वात्। नचैवमनवस्था तदनुसरणावश्यम्भावानङ्गीकारात्। एवं त्रिचतुरज्ञानजन्मनोनाधिकमतिरिति न्यायात्। नचान्तिमासत्त्वे पूर्व्वपूर्व्वप्रवाहासत्त्वापत्तिस्तथाचावगममादायापि न निस्तार इति वाच्यम्। अस्त्वेवं हि तथापि त्रिचतुरज्ञानकक्षागवेषणमात्रविश्रान्तेन विचारेण ततःपरमननुसरणरमणीयेनैव समयं बद्धा कथाया मिथःसम्प्रतिपत्त्या प्रवर्त्तनात्। अन्यथा प्रमाणादिसत्ताभ्युपगमेऽपि ज्ञानानवस्थायादुष्परिहरत्वात्। नच वाच्यं मत्पक्षे स्वरूपसता ज्ञानेन व्यवहारस्य चरितार्थयितुं शक्यत्वात् न ज्ञानस्य परम्परानुसरणमुचितं नत्वेवं त्वत्पक्षे ज्ञानस्वरूपसत्ताङ्गीकारप्रसङ्गादिति। स्वरूपसत्तामादायापि परिहरतोऽनवस्थाप्रसङ्गस्य स्वप्रकाशप्रस्तावे वक्तव्यत्वात्। यथा त्वत्पक्षे स्वरूपसदविशेषेऽपि ज्ञानस्वरूपसत्त्वैव परं व्यवहारोपपादिका न घटादिसत्ता। एवमेवासत्ताऽविशेषेऽपि ज्ञानमेवासद्व्यवहारोपपादकं नान्यत्। असच्चोपपादकञ्चेति व्याहतमिति चेन्न सदुपपादकमिति कुतो न व्याहतम्। नहि सदुपपादकमसच्च नेति क्वचिदावयोः सिद्धम्। ननु तदसत्ताऽविशेषात्तत्कार्य्यस्यान्यदापि प्रसङ्गः, न कार्य्यस्याद्यसत्ताक्षण इवान्यदापि सामग्रीसत्त्वाविशेषात्तवापि किं नान्यदा कार्य्यजन्म। अथ न मम तदानीन्तनं सामग्रीसत्त्वं तदातनस्य कार्य्यजन्मनो नियामकं किन्तु ततः प्राक् सामग्रीसत्त्वं तथादर्शनात्। तर्हि ममापि कालान्तरस्थमपि तदसत्त्वं तदातनकार्य्यजन्मनोनियामकं तथादर्शनादेव। मम तदव्यवहितोत्तरत्वं तदा कार्य्यजन्मनियामकमिति चेत् न समसमयत्वादागन्तुकत्वाच्चाविशेषेण नियम्यनियामकव्यवस्थानुपपत्तेः तस्मादन्यदास्थाया एव सामग्र्यास्तदा कार्य्यनियमोऽभ्युपेयः तथादर्शनादित्येव मन्तव्यम्। तथा च समः समाधिः। तथापि कार्य्यजन्मकालस्य कोविशेषः। कार्य्यजन्मैव। अन्यथा यद्विशेषान्तरं तदपि विशेषान्तरवतः कालस्य स्यादिति अपर्य्यवसानमेव पर्य्यवस्येत्। तथापि तत्कालस्यानुगतं किं रूपमिति चेन्न रूपान्तरवतोपि किं रूपमित्यपि पर्य्यनुयोगस्यानुवृत्तेः। किञ्च

"अन्तर्भावितसत्त्वञ्चेत्कारणं तदसत्ततः।